॥ उषा ॥



A VEDIC PERIODICAL;

DEVOTED TO THE PUBLICATION OF RARE AND VALUABLE VEDIC WORKS AND TO DISSERTATIONS ON SUCH SUBJECTS.

प्रत्नधर्मरीतिनीतिविज्ञतादिकाशिनी, लुप्तकल्पसाङ्गवेददर्शनादिजीविनी ।
प्रत्नकर्मनन्दिनी च यानशर्मसाधिनी, सत्यभा उषेय मेतु सुप्रभातभाविनी ॥

EDITED BY
PANDIT SATYAVRATA SÁMAŚRAMÍ.

		INDIAN.		FOREIGN.
Subscription for each Number, with postage	...	Re. 1	...	2s.
" for each Vol. (12 Nos.), *advance* "	...	Rs. 10	...	£1

Agents :—

1. Messrs. Luzac & Co., 46, Great Russell Street, W.C., London.
2. Otto Harrassowitz, Esq., Leipzig (Germany).
3. Pandit Jyeshtharam Mukundji, Bombay.

CALCUTTA:
PUBLISHED BY THE EDITOR, AND
PRINTED BY MAHENDRANÁTH SARKÁR,
AT THE SATYA PRESS, 16/1, GHOSE'S LANE.

शककाल: १८१७ । 1895.

OPINIONS.

Annual address delivered to the Asiatic Society of Bengal, by
THE HON. SIR CHARLES ALFRED ELLIOTT, K. C. S. I.,
President of the Society.

"One or two minor *bráhmana* and *sútra* works of the Sáma-veda have appeared in Pandit Satyavrata's well-known vedic magazine *Ushá*. I may here remark that this publication maintains its high standard of excellence, and that the last numbers published contain several other small though important, vedic texts. Special attention may be given to the useful compilation by the Editor called the *Trayísamgraha* which has now been completely published. The Atharva-veda has attracted more attention."

(7th Feby. 1894.—pp. 15-16.)

From Prof. F. Max Muller, Oxford :—

(A) "I am much obliged to you for a number of the Usha. I have read the whole of it with great interest. ... the Mantropanishad is very valuable .... The Samavedapratisak'iya also is very curious ... ." (25 May, 1890)

(B) "I have read your article on the Kanyavivaha Kala. It is most excellent and has pleased me so much that I have asked my Secretary to translate it into English. What a pity it was not published while the controversy was going on. It seems to me the best that has been written on the subject, but it throws a bad light on Raghunandan. I have been translating the Yajnaparibhashasutras, and should have wished to have the whole text as edited by you. * * *." (July 24, 91.)

From Prof. Emile Senart, Paris :—

"I need hardly tell you that I am highly interested in the enduring prosperity and regular progress of your Usha. * * *."

From R. Rost, Esq., Librarian, India Office :—

"I thank you much for your kind letter of May 6, and for the enclosures in reference to your Usha. Your name as Editor of the Pratna-Kamra-nandini has long been very favourably known to me : and I much regretted the discontinuation of that excellent collection of rare Sanskrit opuscula. By confining yourself to Vedic literature in your present serial, you will, I have no doubt, have the sympathy and support of Sanskrit scholars generally * * *." (June 6, 1890.)

From Dr. A. Fuhrer, Lucknow :—

"The 8th part of the Usha is very interesting, and I am sure you will secure more subscribers in Europe. Could you not publish the Rigveda Pratisakhya or the Atharvaveda with Sayana's commentary ?"

Usha I. 1.—"A Vedic journal devoted to the spread of the knowledge of the Vedas in India. It gives short accounts of the religion, morality, wisdom, medicine, gratitude and riddles of ancient India. But the most important article is that in which the editor gives the different methods of

॥ अथ ॥

॥ पार्षदसूत्रम् ॥

——∽*∽——

॥ अथ प्रथमाध्याये प्रथमः पटलः ॥

(मङ्गलाचरणम्)

ॐ। परावरे ब्रह्मणि यं सदाहु-
र्वेदात्मानं वेदनिधिं मुनीन्द्राः।
तं पद्मगर्भं परमं त्वादिदेवं
प्रणम्यर्चां लक्षण माह शौनकः॥ १ ॥

(तत्रायं प्रथमः खण्डः)

अकारऋकारावि उ ए ओ ऐ औ पदाद्यन्तयोर्न लृकारः स्वरेषु। आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु पञ्चस्वपि तानि सन्ति। कखौ गघौ ङ चछौ जझौ ञ टठौ डढौ ण तथौ दधौ न। पफौ बभौ म यरलवा हशषसा ×क ⨯पा इति वर्णराशिक्रमश्च ॥१॥

(अथ द्वितीयः खण्डः)

अष्टौ समानाक्षराण्यादितस्ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि। एते स्वरा ईपरो दीर्घवत् प्लुतो ऽनुस्वारो व्यञ्जनं वा स्वरो वा। सर्वः शेषं व्यञ्ज-

नान्येव तेषा माद्याः स्पर्शाः पञ्च ते पञ्चवर्गाः। चतस्रोऽन्तस्थास्तत उत्तरेऽष्टा ऊष्माणोऽन्त्याः सप्त तेषा मघोषाः। वर्गेवर्गे च प्रथमावघोषौ युग्मौ सोष्माणा वनुनासिकोऽन्तः। तस्मादन्य मवसाने तृतीयं गार्ग्यः स्पर्शप्रथमं शाकटायनः। ओजा ह्रस्वाः सप्तमान्ताः स्वराणा मन्ये दीर्घा उभये त्वक्ष-राणि। गुरूणि दीर्घानि तथेतरेषां संयोगानुस्वार-पराणि यानि। अनुस्वारो व्यञ्जनं चाचराङ्गं स्वरान्तरे व्यञ्जनान्युत्तरस्य। पूर्वस्यानुस्वारविसर्जनीयौ संयो-गादिर्वा च परक्रमे द्वे ॥ २ ॥

(अथ तृतीयः खण्डः)

मात्रा ह्रस्वस्तावदवग्रहान्तरं द्वे दीर्घस्तिस्रः प्लुत उच्यते स्वरः। अधःस्विदासी३ दुपरिस्विदासी३ दर्थेप्लुतिभीरिव विन्दतीं चिः। स्वरभक्तिः पूर्वभाग-क्षराङ्गं द्राघीयसी सार्द्धमात्रेतरे च। अर्द्धी वान्या-रक्तसंज्ञो ऽनुनासिकः संयोगस्तु व्यञ्जनसन्निपातः। कण्ठ्यो ऽकारः प्रथमपञ्चमौ च द्वा ऊष्मणां केचि-देता उरस्यौ। ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वा-मूलीयाः प्रथमश्चवर्गः। तालव्यावेकारचकारवर्गौ विकारैकारौ यकारः शकारः। मूर्द्धन्यौ षटकारवर्गौ

दन्तमूलीयस्तु तकारवर्गः। सकाररेफलकाराश्च रेफं वर्त्स्यं मेके शेष ओष्ठ्योपपाद्यः। नासिक्यां नासिक्य-यमानुस्वारा इति स्थानान्यच यमोपदेशः॥ ३ ॥

(अथ चतुर्थः खण्डः)

जिह्वामूलं तालु चाचार्य आह स्थानं डकारस्य तु वेदमित्रः। द्वयोश्चास्य स्वरयोर्मध्य मेत्य सम्पद्यते स डकारो ळकारः। ळ्हकारता मेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्तः। इळा साळ्हा चात्र निदर्शने द्वे वीड्वङ्ग इत्येतदवग्रहे तु। न्यायैर्मिश्रान-पवादान् प्रतीयात्सर्वं हि शास्त्रं प्रति कण्ठ मुक्तम्। स्थानप्रश्लेषोपदेशे स्वराणां ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ। असावमु मिति तद्भाव मुक्तं यथान्तरं पादवच्चैव प्रैषान्। प्रष्कानार्षादितिकरणात्पदान्तां-स्तद्युक्तानां तेन ये संहितानाम्। सामवशा इति चैवापवादान् कुर्वन्ति ये सम्पदं पादवृत्तयोः। अप्लुत्याम्नाये पदवच्च पद्यान्तेनतोपाचरितक्रम-स्वरान्॥ ४ ॥

(अथ पञ्चमः खण्डः)

अष्टावाद्यानवसाने प्रगृह्यानाचार्या आहुरनु-नासिकान् स्वरान्। तत्त्विमाचे शाकला दर्शय-

न्याचार्यशास्त्रापरिलोपहेतवः । ऋकारादयो दश नामिनः स्वराः पूर्वोऽनन्त्यानतिषु नम्य मुत्तरम् । सहोपधो रिफित एकवर्णवद्विसर्जनीयः स्वरघोषवत्परः । ओकार आमन्त्रितजः प्रगृह्यः पदं चान्यो पूर्वपदान्तगश्च । षष्ठादयश्च द्विवचोतभाजस्त्रयो दीर्घाः साप्तमिकौ च पूर्वौ । अस्मे युष्मे त्वे अमी च प्रगृह्या उपोत्तमं नानुदात्तं न पद्यम् । उकारश्चेतिकरणेन युक्तो रक्तो पृक्तो द्राघितः शाकलेन । ऊष्मा रेफी पञ्चमो नामि पूर्वौ संहोपोवर्जं मितरो यथोक्तम् । अन्तोदात्त मन्तरचा विपर्यये स्पर्शे चोपः प्रत्यये पूर्वपद्यः ॥ ५ ॥

(अथ षष्ठः खण्डः)

प्रातर्द्वैवं भार्वधराद्युदात्तं कर मुदात्त मविभक्तादः । स्तः प्रागाथ मेतश्चे कर्द्विवे करपस्करत् सारविपूर्वमस्तः । स्वः स्वरितं न समासाङ्ग मुत्तमं स्वरादेशो पूर्वपदेष्ववर्महः । अनर्द्वर्चान्ते स्वरघोषवत्पर सूधर्न रेफेऽरूषामो ऽटषान्महो । वरवरावरिति चैकपादे व्यपपूर्वाश्वसमः साङ्गयोगे । पथ्या मघोनी दिवि चत्तसा मदे पूर्वोऽर्चिषातीटषामोत्तरेषु न । होतः सनितः पोतर्नेष्टः सोतः सवितर्नेतस्त्वष्टः ।

मातर्जनितर्भ्रातस्त्रातः स्थातर्जरितर्द्धातर्द्वर्त्तः। जामातर्दुहितर्दर्त्तः प्रशास्तरवितः पितः। दोषावस्तरवस्यर्त्तः प्रयन्तस्त्वंग्य मुत्तमम्। दीधरभारवरीवरदद्दृ-दर्दरदर्द्वरजागरजीगः। वारपुनःपुनरस्थरकस्यः सस्वरहः सनुतः सबरस्वाः॥ ६॥

॥ इति पार्षदे प्रथमाध्याये प्रथमः पटलः॥

॥ अथ द्वितीयः पटलः ॥

(तत्रायं प्रथमः खण्डः)

संहिता पदप्रकृतिः पदान्तान् पदादिभिः सन्दधदेति यत्सा। कालाव्यवायेन स्वरान्तरन्तु विवृत्तिः सा स्वरभक्तिकाला। पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टेषु वचनात्प्रतीयात्। पदं पदान्तादिवदेकवर्णं प्रश्लिष्ट मथानुपूर्वेण सन्धीन्। एषस्य स च स्वराश्च पूर्वं भवति व्यञ्जन मुत्तरं यदेभ्यः। तेऽन्वक्षरसन्धयो ऽनुलोमाः प्रतिलोमास्तु विपर्ययेऽत एव। तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु नियन्त्यथेतरेषु। ऊष्मा परिलुप्यते चयाणां स्वरवर्जं न तु यत्र ता निपात्याः। पुर एता तितउना प्रउगं नम-

उक्तिभिः । अन्तःपदं विवृतयोऽतोऽन्याः पदसन्धिषु ॥ १ ॥ ७ ॥

(अथ द्वितीयः खण्डः)

समानाक्षरे संस्थाने दीर्घ मेक मुभे स्वरम् । इकारोदय एकार मकारः सोदयस्तथा । उकारोदय ओकारं परेष्वैकार मोजयोः । ओकारं युग्मयोरेते प्रश्लिष्टा नाम सन्धयः । समानाक्षर मन्तस्थाः सामकण्ठ्यं स्वरोदयम् । न समानाक्षरे स्वे स्वे ते क्षैप्राः प्राकृतोदयाः । विसर्जनीयो रिफितो दीर्घपूर्वः स्वरोदयः । आकार मुत्तमौ च द्वौ स्वरौ ताः पदवृत्तयः । ह्रस्वपूर्वस्तु सोकारं पूर्वौ चोपोत्तमाक्षरौ । त उद्ग्राहा दीर्घपरा उद्ग्राह्यपदवृत्तयः ॥ २ ॥ ८ ॥

(अथ तृतीयः खण्डः)

ओष्ठ्ययोन्योर्भुग्नमनोष्ठ्य वकारोऽचान्तरागमः । ऋकार उदये कण्ठ्यावकारं तदुद्ग्राहवत् । उद्ग्राहाणां पूर्वरूपाण्यकारे प्रकृत्या द्वे ओभवत्येकमाद्यम् । प्राच्यपञ्चालपदवृत्तयस्ताः पञ्चालानामोष्ठ्यपूर्वा भवन्ति । अथाभिनिहतः सन्धिरेतैः प्राकृतवैकृतैः । एकीभवति पादादिरकारस्तेऽत्र सन्धिजाः । अन्तःपाद मकाराच्चेत् संहितायां लघो-

लंघु। यकारादयुत्तरं पदं वकारादयपि वा भवेत्। अन्यादयपि तथायुक्त मावोन्तोपहितात्मवः। अये-योवेव इत्यन्तैरकारः सर्वथा भवेत् ॥ ३ ॥ ९ ॥

(अथ चतुर्थः खण्डः)

व इत्येतेन चानप्रद्युचित्रः सवितैवकः। पदै-रुपहितेनैतैः सर्वैरेवोदयाः परे। अदादवर्चौ जनयन्ता-व्यत्या अभेदयोपाष्टिरवंत्ववीरता। अमु मुक्त ममत-येनशामहा अत्रत्वचो वीरते वास्यवो रथाः। वासो वायो ऽभिभुवे कवष्यः संक्रन्दनो ऽधीजवनः स्वधावः। उत्सादत ऋतादः सगर्भ्यौ हिरण्यशृङ्ग इति चोप-धाभिः। ये३रा रायो धमे धायिनो हिरग्ने ऽभि-दासति। जायमानो भवोग्ने यं न्तोपोंह्रोतिपि-प्रति। जम्भयन्तो हि मरुतो नु भर्चौ वयसे ऽविष्यन्व-युने जनिष्ट। वृचहत्ये वीः समरेतमाना मरुतो मदन्नभितो नवन्त ॥ ४ ॥ १० ॥

(अथ पञ्चमः खण्डः)

ब्रुवतेध्वस्तवसि वाचि मेरपद्दधिरे ग्ना नहुषो ऽस्मत् पुरोऽभिनत्। उपतेध्वांवह्हतेयंयमोदिति-र्जनुषोयात्सुवितोनुश्रियोधितावपुषेनुविशोयन्तसन्तो-ऽवद्यानिखेऽनसः। भरन्तोऽवस्यवोवोस्तु बुध्नो३जो-

मायिनोधमः । देवोनयत् पुरूवसो ऽसुरघ्नो भूतोऽभिश्वेतोरुषस्तेन नोद्य। येजामयस्ते रदन्नोधिवक्ता तेऽवद्धन्ते तेऽरुणेभिः सदोधि । स्वाध्यो जनयन् धन्वनोऽभिमातीरग्ने यदह मनसो धियो धनः। योऽह्यस्ते ऽविदस्तपसो धिनयोऽधिपादोऽस्य यो विब्राह्मणोऽस्य योऽनयत्। सोऽस्माकं यो द्वेषोभ्योऽन्यकृतेभ्यस्ते भ्योकारं पयस्वन्तो मृताश्च। अन्योर्वाक्येथो इति चोदयेषु पुनः पराके च परावतश्च॥ ५॥ ११॥

(अथ षष्ठः खण्डः)

अन्तःपादं च वयो अन्तरिक्षे वयो अस्याः अथयो हेतयस्त्वयः। वो अन्धसः शयवे अश्विनोभये अवो अधिसाऽर्जयो जामयः पयः। प्रकृत्येतिकरणादौ प्रगृह्याः स्वरेषु चार्ष्यां प्रथमो यथोक्तम्। सहोदयास्ताः प्रगृहीतपादाः सर्वत्रैव चाक्षरान्तास्तु नेवे। आर्ष्या मेव सन्ध्ययकारपूर्वो विवृत्तेश्च प्रत्ययः सनुकारः। उकारादौ स्वितिपूर्षेत्यकारे न चेत्तदेकाक्षरं तत्र पूर्वम्। अद्य सम्राज्ञी सुशमी स्वधाती पृथुज्रयी पृथिवीषा मनीषा। अयानिद्राज्या प्रयेति स्वराणां मुखेग्र परे पञ्चमषष्ठयोश्च। स्वरे पादादा उदये सचे

तिष्ठन्तं जोषं चर्षणीस्त्वर्षणिभ्यः। एकारान्तं मित्र-योरस्मदीवन्नमस्युरित्युपधं चेत्यपृक्तम् ॥ ६ ॥ १२ ॥

(अथ सप्तमः खण्डः)

एकारौकारपरौ च कण्ठ्यौ लुशाद्वर्वाग्गोतमे चाभि-नन्त। विभ्वा विधर्त्ता विपन्या कदाया मातेत्यका-रेऽप्यपादादिभाजि। परुच्छेपे ऽभीप्रापथेत्यकार एवाँ अग्निमचिषु सा प्लुतोपधा। सचादयो या विहिता विवृत्तयः प्लुतोपधा ता अनुनासिकोपधाः। सेदु सास्मिन् सेमभि साभिवेगः सेद्भवः सोपमा सौष-धीरनु। सास्मा अरं सोतनः सेन्द्र विश्वा सेति सास्माक मनवद्य सासि। सेदग्ने सेदग्निर्बामिष्ठं सास्मा-कभिः सेदुग्रः समे। सैना सैनं सेमं सोदञ्चं सेमां सोषान्त्सेशे सेदिशे। नू इत्था ते सानो अव्ये वो अस्मे वासौ वेद्यास्याम्। धिष्णा मे नू अन्यत्राचित् पादादौ नू इन्द्रोत्यर्वाक् ॥ ७ ॥ १३ ॥

(अथ अष्टमः खण्डः)

उदू अयान् रजेषितं धनर्चं शतर्चसं दशोण्ये दशोण्ये। यथोहिषे यथोचिषे दशोणिं स्वरोदयं पिबा इमं रथोळ्ह। वीरास एतं तमू अक्रण्वं स्तता-रेम प्रेष पूरोदसीमे। धन्वर्णसः स्वरपसः सचोत

प्रधीव वीळ्ू उत सत्त्ववाजौ। अश्विनेव पीवोपवसनानां महो आदित्यानुषसा मिवेतय:। स्तोतव अम्बाञ्च सृजा इरध्यै सचेन्द्रसानो अव्ये स्वधामिता। गोओपशा गोऋजीक प्रवादौ मनीषा आ त्वा पृथिवी उत द्यौः। मनीषा वसूरणाया इहाव बृहती इवेति च यथागृहीतम्। योनिमारैगगादारैगारैग् दुर्योण आवृणक्। हन्व्यासदुप आरुपित मनायुधास आसता ॥ ८ ॥ १४ ॥

(अथ नवमः खण्डः)

अस्त्वासतो निराविध्यदभ्यादेयं क आसतः। न्यावृणङ् नकिरादेवो न्याविध्यदेन मायुनक्। अहिहन्तारिणक् पथ आयुच्चाता मुदावता। रिक्थमारैग् यआयुणक् कुरु श्रवण मावृणि। शुनश्चिच्छेपं निदितं नरा वा शंसं पूषणम्। नरा च शंसं दैव्यं ता अनानुपूर्वसंहिता। यतो दीर्घस्ततो दीर्घा विवृत्तयो द्विषन्धयस्तूभयतः स्वरः स्वराः। प्राच्यपञ्चालउपधानिभोदयाः शाकल्यस्य स्थविरस्येतरा स्थितिः ॥ ९ ॥ १५ ॥

॥ इति पार्षदे प्रथमाध्याये द्वितीयं पटलम् ॥

॥ अथ तृतीयं पटलम् ॥

(तत्रायं प्रथमः खण्डः)

उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।
आयामविश्रम्भाक्षेपैस्त उच्यन्तेऽक्षराश्रयाः ।
एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ।
तस्योदात्ततरोदात्तादर्द्धमात्रार्द्धमेव वा ।
अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत् ।
उदात्तं वोच्यते किञ्चित् स्वरितं वाक्षरं परम् ।
उदात्तपूर्वं स्वरित मनुदात्तं पदेऽक्षरम् ।
अतोऽन्यत्स्वरितं स्वारं जात्य माचक्षते पदे ।
उभाभ्यान्तु परं विन्द्यात् ताभ्या मुदात्त मक्षरम् ।
अनेक मप्यनुदात्तं न चेत्पूर्वं तथागतात् ॥१॥१६॥

(अथ द्वितीयः खण्डः)

उदात्तवत्येकीभाव मुदात्तं मध्य मक्षरम् ।
अनुदात्तोदये पुनः स्वरितं स्वरितोपधे ।
इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु च ।
उदात्तपूर्वरूपेषु शाकल्यस्यैव माचरेत् ।
माण्डूकेयस्य सर्वेषु प्रश्लिष्टेषु तथा स्मरेत् ।
इत्येकीभाविनो धर्माः परैः प्रथमभाविनः ।

उदात्तपूर्वं नियतं विवृत्या व्यञ्जनेन वा।
स्वर्यतेऽन्तर्हितं न चेदुदात्तस्वरितोदयम्।
वैवृत्ततैरोव्यञ्जनौ चैप्राभिनिहितौ च तान्।
प्रश्लिष्टं च यथासन्धिः स्वरानाचक्षते पृथक् ॥२॥१७॥

(अथ तृतीयः खण्डः)

स्वरितादनुदात्तानां परेषां प्रचयः स्वरः।
उदात्तश्रुतितां यान्त्येकं द्वे बहूनि वा।
केचित्त्वेक मनेकं वा नियच्छन्त्यन्ततोऽक्षरम्।
आवशेषान्नियुक्तं तूदात्तं स्वरितोदयम्।
नियमं कारणादेके प्रचयस्वरधर्मवत्।
प्रचयस्वर आचारः शाकल्यान्यतरे ययोः।
परिग्रहे त्वनार्षान्तात्तेन वैकाक्षरीकृतात्।
परेषां न्यसमाचारं व्याडिस्तौ चेत् स्वरौ परौ।
यथा सन्धीयमानाना मनेकीभवतां स्वरः।
उपदिष्टस्तथा विद्यादक्षराणा मवग्रहे ॥३॥१८॥

(अथ चतुर्थः खण्डः)

पद्यादींस्तु द्व्युदात्ताना मसंहितवदुत्तरान्।
जात्यवद्वा तथा वान्त्यौ तनूशचीतिपूर्वयोः।
चिमाक्षयोरुत्तरयोरन्यापि प्रचयस्वरे।
माक्षान्यस्ततरेकेषा मुभे व्याडिः समे स्वरे।

असन्दिग्धान् स्वरान् ब्रूयादविक्रुष्टानकम्पितान् ।
स्वरितं नातिनिर्हन्यात् पूर्वौ तानि विवर्त्तयेत् ।
जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च ।
एते स्वराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः ॥४॥१९॥

॥ इति पार्षदे प्रथमाध्याये तृतीयं पटलम् ॥

॥ अथ चतुर्थं पटलम् ॥

(तत्रायं प्रथमः खण्डः)

स्पर्शाः पूर्वे व्यञ्जनान्युत्तराण्यास्थापिता नाम वशङ्गमं तत् । घोषवत्पराः प्रथमास्तृतीयान्त्स्वानुत्तमानुत्तमेषूदयेषु । सर्वैः प्रथमैरुपधीयमानः शकारः शाकल्यपितुश्छकारम् । पदान्तैस्तैरेव तृतीयभूतैस्तेषां चतुर्थानुदयो हकारः । विस्थाने स्पर्श उदये मकारः सर्वेषा मेवोदयस्योत्तमं स्वम् । अन्तस्थासु रेफवर्जं परासु तान्तां पदादिष्वनुनासिकान्तु । तथा नकार उदये लकारे ञकारं शकारचकार वर्गयोः । तकारो जकारलकारयोस्तौ तालव्य घोष उदये चकारम् । छकारं तयोरुदयः शकारो

न शाकल्यस्य ता वशङ्गमानि। रेफोष्मणोरुदयो-
र्मकारो ऽनुस्वारं तत्परिपन्न माहुः ॥ १ ॥ २० ॥

(अथ द्वितीयः खण्डः)

ङकारे घोषोष्मपरेऽन्तरैके ककारं टकारनकारयोस्तु। आहुः सकारोदययोस्तकारं ञकारे शकारपरे चकारम्। तेऽन्तःपादा अकृतसहिताना मूष्मान्तानां पटलेऽस्मिन्विधानम्। चित्कम्भने नोष्मलोपः ककुम्मान् सम्राट् शब्दः परिपन्नापवादः। विसर्जनीय आकारमरेफी घोषवत्परः। ओकारं ह्रस्वपूर्वस्तौ सन्धी नियतप्रश्लिष्टौ। सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफी ते पुना रेफसन्धयः। रेफोदयो लुप्यते द्राघितोपधाह्रस्वस्याकामनिपाता उभाविमौ। अघोषे रेफ्यरेफी चोष्माणां स्पर्श उत्तरे। तत्तत् स्थान मनूष्मपरे तमेवोष्माण मूष्मणि ॥२,२१

(अथ तृतीयः खण्डः)

प्रथमोत्तमवर्गीये स्पर्शे वोष्मणि चानते। व्यापन्न ऊष्मसन्धिः स विक्रान्तः प्राकृतोपधः। ऊष्मण्यघोषे लुप्यते परे नतेऽपि सोऽन्वचरसन्धिवत्कः। अवग्रावृत्तिः कखपफेषु विवृत्ती रेफं स्वद्रूःपूरघोषेष्ववग्रहे। नाचा इन्दुः सुधितीवाह एव

भूम्याददेऽहोभिरुषर्वसूयवः। आवर्त्तमोऽहोराचाण्य-
द्रोपितो प्रचेता राजन्वर्त्तनीरहेति च। यथा-
दिष्टं नामिपूर्वः षकारं सकारमन्यो रिफितः
ककारे। पकारे च प्रत्ययेऽन्तःपदन्तु सर्वचैवो-
पाचरितः ससन्धिः। अन्तःपादं विगृहेऽकारपूर्वः
पतिशब्दे ह्यचरे पुंस्प्रवादे। कारं कृतं कृधि कारत्करि-
त्यपि परेषु पादान्तगते परीति च ॥ ३ ॥ २२ ॥

(अथ चतुर्थः खण्डः)

असोन्तो रेफवतः पारशब्दे परि कृतानि कर-
तीति चैषु। अपादान्तीयेष्वपि प्रत्ययेषु वास्तो-
रित्येतत्पतिशब्द उत्तरे। आविर्हविर्ज्योतिरित्युत्त-
रश्चेत्ककारोऽथोपान्तमध्यन्तिशब्दौ। इळायागा
नमसो देवयु द्रुहो मातुरिळस्तानि पदप्रवादे। पूर्वः
पुरः पूरिति पूर्वपद्यान् पदानि चापोद्य नवैतदेवम्।
अस्या यः सोमो बृहतोऽस्य पूर्व्या जरुर्ज्योतिर्जात-
इभो वृधोऽन्यः। ब्रह्मणो ह्वे व्रातऋतो विदुर्वसुः
पशुरेतानि कविशब्द उत्तरे। पथिशब्दे जिन्वथश्चेत्
तथो महः पृथुशब्दे विश्वतो वीळितो रजः। काम-
पोषपूर्द्धिशब्देषु रायः पदादिरन्तश्च दिवस्परीति च।
दिवस्पृथिव्या अध यश्च दीष्टपूर्वं पादादौ यदि सख्य-
दीष्ट ॥ ४ ॥ २३ ॥

(अथ पञ्चमः खण्डः)

शवसो महः सहस इळायाः पात्विस्येकं पुत्र-शब्दे पराणि। रायस्त्वा महस्करथो महस्परं निष्क्-वरादं निष्कृथ निष्पिपर्त्तन। कबन्धं पृथु कण्वासः पुत्रः पातु पथा पयः। पायुः पृष्टं पदं तेषां प्रवाद उदये दिवः। रजसस्पात्वन्तस्पथाः कस्कावराचतुर-स्करः। स्वादुष्किल निदस्पातु द्यौष्पितर्वसतिष्वृता। तपोष्पवित्रं त्रिष्पूत्वी धीष्पीपाय विभिष्पितातात्। द्यौष्पिता रजसस्पृष्टौदुष्पञ्जाय नस्करः। वसु-ष्कृ विन्मनुष्पिता पितुष्पिता पितुष्परि। प्रणस्पुरो मयस्करं नभस्पयस्त्वयस्परः ॥ ५ ॥ २४ ॥

(अथ षष्ठः खण्डः)

नकार आकारोपधः पद्यान्तोऽपि स्वरोदयः। लुप्यते ऽज्जान् जगृसानान् जघन्वान् हितदेवहूत-मान्। बद्बधानाँ इन्द्रसोमाँ स्तृणाणा नो देव-देवान्। हन्त देवाँ इति चैता आन् पदाः पद-वृत्तयः। विवृत्यभिप्रायेषु च पिबो अन्नाँ रयि-व्यधः। दधन्वाँ योजुजुर्वाँ यः स्ववाँ यातु तद्वाँ चेति। ऋतं योनौ वचोभिर्यान्युवन्यून् वनिषीष्टेति। ईकारोकारोपहितो रेफ मेषु स्वरेषु च। दस्यूँ रेको

नृ्ँरभि च ते स्पर्शरेफसन्धयः। नास्मानुपैतावान् स्फुरान् गच्छान् देवानयाड्वहान्। हिरण्ययचक्रान्मायावान् घोषांस्तानश्विना विद्वान्। पयस्वान्पुत्रानाधेह्यायजहीयान् पतीनुरोः। चरति चक्रे चमसांश्च वोचिच्चरसि च्यौत्नश्चतुरश्चिकित्वान्। एतेषु सर्वत्र विसर्जनीयवद्दीर्घोपधोऽस्माच्चमसान् पशून्न। तांस्ते सर्वांस्तान् देवांस्त्वन्तांश्चाय स्वावदंस्त्वञ्च। विसर्जनीयं परेष्विति ते च स्पर्शोष्मसन्धयः। नॄँःपतिभ्यो नॄँःप्रणेत्रं नॄँःपात्रं स्वतवाँः पायुः। सन्धिविक्रान्त एवैष नॄँःपाहि शृणुधीति च। नकारस्य लोपरेफोष्मभावे पूर्वं तत्स्थानादनुनासिकः स्वरः। आदिस्वरश्चोत्तरेषां परेऽपि मांस्पचन्या मांश्चत्वे मांश्चतोश्च ॥ ६ ॥२५ ॥

(अथ सप्तमः खण्डः)

ईमित्यन्तलोप एषूदयेषु गर्भं गावो वत्सं मृजन्ति पृच्यते। सखायो विव्याच पुना रिणन्ति रथ मित्यन्वच्चरसन्धिरेव सः। पुरुपृष्ठ्वधिपूर्वेषु शकार उपजायते। क्रस्वे च पूर्वपदान्ते चन्द्रशब्दे परेऽन्तरा। परीति पदे क्रपरे क्रकारो वनेति रेफः सदशब्द उत्तरे। परिष्कृण्वन्ति वेधसो स्कृतीभसं

शौद्राचरा: सन्धय एत उक्ता:। मेधातिथौ वरुणान्तव्रतान्तौ स्पर्शान्तस्था प्रत्ययौ निर्हृसेते। आदित्या देवा वरुणा सुरेति येत्यादिषु वय मित्यत्र मित्रा। यासु प्रतीकं निष्णातं पुरोहिति: चत्वं द्वाशति: शवसा भिषज्यथ:। सोचिन्वगस्त्ये दशमे च मण्डले सान्वीयते ष: पलिक्नीर्हिषस्तव। जुगुत्सतो दुदुत्सन् गा अदुदुत्सन्वृधेऽस्य दुत्सतानुदत्वि। दत्सन्न पत्मन्दत्तुषोऽभिदत्सत् कृष्णासो दत्वि हि यानस्य दत्तो: ॥ ७ ॥ २६ ॥

॥ इति पार्षदे प्रथमाध्याये चतुर्थं पटलम् ॥

॥ अथ पञ्चमं पटलम् ॥

(तत्रायं प्रथम: खण्ड:)

अन्त:पादं नाम्युपध: सकार: षकार मप्यूष्मपरे यथोक्तम्। अन्यैरेकारान्नतिरत्र पूर्वा ततो व्यापत्तिर्भवतीति विद्यात्। सूतीनकिस्वैर्गुरुनह्यतिची निहिते सन्ध्यक्षरेणैव सत्स्य:। सवत्सचरेण पदादयश्च स्प्रीतिस्क्रितिस्त्रित्यरेफस्य च स्मिति। एका-

रेणापि स्विततिनः परं चेद् दीर्घौ नस्तृत्पुचनास्पर्श-पूर्वम्। तकारवर्गस्तु टकारवर्ग मन्तःपादस्थोऽपि षकारपूर्वः। सितां सधस्तात् स्वनिहित स्तवाम स्तुवे स्तुवन्ति स्तुहि सीं स्तुत स्थ। साहित स्तुपस्त्रिसत् सत्स्वनीति स्तोभेत्यादिश्चापि बह्वृचरान्तैः। निप-रीति स्वसीत्यादि चकारवर्गीयोदयौ। दकारे योत्तरे परान् सेससीति स्वरोदये॥ १॥ २८॥

(अथ द्वितीयः खण्डः)

सेध स्थापय सस्वजे सस्वजाते ससाद च। सन्तं सन्तः सन्ति पूर्वाः स्युः स्याः स्यादिति चोत्तरः। हिषिञ्च तूषिञ्च रजः सुषीदन्निताेषिञ्च ताभिषतः किमुष्वित्। सूरिभिः ष्याम दिधिषन्तु केष्वप्रतिस्फुर-चीषधस्थाक मुष्वित्। उषुवाणो दिविषन् सूरिभिः ष्या मृच्छन् तिष्ठन् ष्ठिरं वंसु षीदति। तुषप्रहिष्ठो यशसा महीषा विषा भूयामोषु यतिष्ठेनेति च। वाजी सुतो वहन्ति सीम्पतिः स्यां दित्ससि सुतः। अपो सुम्यच्च सुधि सुचि स्म स्तुहि स्तुहीति नः। युग्मान्तस्था दन्त्यमूलीयपूर्वैरन्तःपदं नाम्यतेऽन्तः-पदस्थैः। अन्यपूर्वैरपि पद्यादिभाक् सन्नकाररेफ-पृतनोपधश्च॥ २॥ २९॥

(अथ तृतीयः खण्डः)

रेफकारकारपरः प्रकृत्या संस्कृक् स्वसर्वरिति चाक्षराणाम्। सेति चास्य परिपन्नोपधा चेत् संयोगस्य चाप्यनुनासिकादेः। सहस्रं सनिता स्याच्चा साविचं सूवरी स्तुषे। समुद्रं सदृशा सारं सायका साधनी सह। सनितः स्पष्टः सदृशः सखायं सप्नैरेतं सानुशब्दश्च पाद्याः। सुते सोमे वचनं प्राभिचर्षणिः स्वभिष्टीत्येव मुपधाश्च सर्वे। अभिसत्वा रयिस्थानो वासिसीष्टाः सिसच्चि च। तिस्तिरे तिस्तिराणा च सिसिचे सिसिचुश्च न। गोष्ठादिव गोषुतमा उपष्टुत्सप्रवादो नार्षदः पर्यषस्वजत्। स्वादुषं सदः पुरुषनि शब्दः सुषं सदं सुषमिधानुसेषिधत् ॥ ३ ॥ ३० ॥

(अथ चतुर्थः खण्डः)

तकारे पूर्वपद्यान्तो व्यापन्नो रेफसंहिते। नामिपूर्वो विग्रहे तु त्वात इत्यनुदात्तयोः। अग्निरेकाक्षरस्यादौ नकिश्चाथो तनूष्विति। तन्नतन्युस्ततश्चुस्तौग्र्य मित्युत्तरेषु निः। पायुभिः पतृभिश्विभिर्दात्वेद्यमायुः शुचिः। उत्तरेत्वनितीयुष्टे वावृधष्टे सधिष्ट च। गोभिष्टरेम क्रतुष्टं नाहुर्निष्पिध्वरीः प्रभोः। वन्दारुः षष्टिराविश्विर्बाह्वोरित्यनुदात्तयोः।

ऋकाररेफषकारा नकारं समानपादेऽवग्रह्यो नमन्ति। अन्तःपदस्थ मकारपूर्वा अपि सन्ध्याः सन्ध्य ऊष्माप्यनिङ्ग ॥ ४ ॥ ३१ ॥

(अथ पञ्चमः खण्डः)

न मध्यमैः स्पर्शवर्गैर्व्यवेतं परि प्र ऋषीन्द्रादिषु चोत्तमेन। तथा सकारशकारव्यवेतं सर्वादिषु पूर्वपदान्तगञ्च। नाभिर्निर्मिकप्रवादादौ यकारः स्पर्शसंहितम्। कर्मनिष्ठान् दीर्घनीथे भानुशब्दं हिनोमि च। क्रस्वादयं त्वेषपूर्वे वमादिषु तृशुभ्रयुष्मादिषु चोभयोदयम्। अहकारेष्वधिकचात्वरेषु च पुनःपुनर्दुस्वतुर्ज्योतिरादिषु। उस्त्रयाम्णो ऽनुश्रयाम्णो सुषाम्णो वृषमण्यबोधिषवण्या प्रण्यः। दूढ्य दूणाश दूळभप्रवादा दुर्दूधूतमत्वरं तेषु न चि। अव्यवे तं विग्रहे विघ्नकृघ्नी रेफोष्मणौ सर्वपूर्वौ यथोक्तम्। आनीन्नु त्यन्नोनुवुर्नोनुमस्च नयत्यर्थञ्च प्रपरीतिपूर्वे ॥ ५ ॥ ३२ ॥

(अथ षष्ठः खण्डः)

पुरुप्रिया ब्रह्मसुतेषि तेषि प्लुताकारान्तं सषकार मिन्द्र। नते सुम्नेति सवनेषु पर्षि स्वर्यमा प्रोरुपरीति तैर्नः। हेळो मुञ्चतं मित्राय राया पूषा

ऽगध्यविषश्छकारवत् । नव्येभिस्त्मने वाजान् कृणोत हेनय प्रतरं परेषु न । गोरोहेन निर्गमाणीन्द्र एणा इन्द्र एणं स्वर्णपरा नुदस्व । अग्ने रवेण वार्णं शक्र एणा मेषाणानतिर्दन्त्यमूर्द्धन्यभावः ॥ ६ ॥ ३३ ॥

॥ इति पार्षदे प्रथमाध्याये पञ्चमं पटलम् ॥

॥ अथ पार्षदे षष्ठं पटलम् ॥

(तत्रायं प्रथमः खण्डः)

स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः सक्रमो विक्रमे सन् । सोष्मा तु पूर्वेण सहोच्यते सकृत् स्वेनासंयोगादिरपिश्छकारः । परं रेफात् स्पर्श एवं लकारादूष्माणो वा नावसितं न रेफः । वोष्मासंयुक्तोऽनुपधो न तूष्मा स्वरोष्मपरो नपर-क्रमोपधा । सहातिहाय पवमान यस्य द्वे तने चेत्यु-पहितः पदादिः । छकारो दीर्घेण चनेतिवर्जं संयुक्तं तु व्यञ्जनं शाकलेन । पदान्तीयो ह्रस्वपूर्वो ङकारो नकारश्चकार मत उत्तरे स्वरे । अनादेशे पटले ऽस्मिन् विधानं सर्वत्र विद्यादपि वैकृतानाम् । अभि-

निधानं कृतसंहितानां स्पर्शान्तस्थाना मपवाद्य रेफम्। संधारणं संवरणं श्रुतेश्च स्पर्शोदयाना मपि वावसाने ॥ १ ॥ ३४ ॥

(अथ द्वितीयः खण्डः)

अन्तस्था स्वे स्वे च परेऽपि रक्ता लकार उष्मस्वपि शाकलेन। सकारे चैव मुदये ककारः क्वातेर्द्वातो-प्सातेर्वा पकारः। पादान्तीया यरवोष्मोदयाश्च स्पर्शाः पदादिष्ववरे मकारात्। असंयुक्तं शाकलं तन्न पद्योऽस्युत्तरे वा त्वनेकाक्षरान्त्याः। सर्वत्रैके करण-स्थानभेदे वा शाकलप्रथमे स्पर्शवर्गे। स्पर्शा यमा-ननुनासिकाः स्वान् परेषु स्पर्शेष्वनुनासिकेषु। न स्पर्शस्योष्मप्रकृतेः प्रतीयाद्यमापत्तिं नाभिविधान-भावम्। यमः प्रकृत्यैव यदृक् श्रुतिर्वा यमेन मुख्यास्ति-समानकाला। अनन्यस्तु प्रकृतेः प्रकृत्यर्थेन संयोगं स्वरभक्तिर्विहन्ति। यमान्नासिक्याः स्वरभक्तिरुत्तरा गार्ग्यस्योष्मासोष्मणो वर्जयेत्तम् ॥ २ ॥ ३५ ॥

(अथ तृतीयः खण्डः)

नादः परोऽभिनिधानाद् ध्रुवं तत्तत्कालस्थान-मश्रुतित्वघोषात्। नासिकास्थान मनुनासिकाश्चे-दन्तस्थायाः पूर्वसरूप मेव। व्याडिः सर्वत्राभि-

निधानलोपः परक्रमे स्वररेफोपधेन। सवर्णपूर्वस्य सहभुवस्य विपर्ययो भुवशिष्टे परेषाम्। रेफात् स्वरोपहिताद् व्यञ्जनोदयादृकारवर्णा स्वरभक्तिरुत्तरा। विच्छेदात् स्पर्शोष्मपराश्च घोषिणो द्राघीयसी तूष्मपरे नराक्रमे। सर्वत्रैके स्वरभक्तेरभावं रेफोपधा मपरे विद्यमानाम्। अक्रान्तोष्मप्रत्ययाभाव मेके पूर्वोत्तरस्वरसरूपताञ्च। ऊष्मोदयं प्रथमं स्पर्शं मेके द्वितीय माहुरपदान्तभाजम्। क्खातौ खकारककारा उ एके तावेव ख्यातिसदृशेषु नामसु॥३॥३६

॥ इति पार्षदे प्रथमेऽध्याये षष्ठं पटलम् ॥

॥ इति प्रथमोऽध्यायः ॥

———

॥ अथ द्वितीयाध्याये प्रथमं पटलम् ॥

(तत्रायं प्रथमः खण्डः)

दीर्घं ह्रस्वो व्यञ्जने ऽन्यस्त्वृकाराद्यथादिष्टं सामवशः ससन्धिः। सैव प्लुतिर्या स्वरेषूपदिष्टा योनिमारैगादिषु चोभयादेः। मक्ष्वित्युकारः प्लवते सर्वत्राथ पदान्तभाक्। सुतायाह्नीत्यतोन्येषु पदेष्वच्छेति विग्रहे। अनाकारोपधस्यान्तो येत्युत्तरपदस्य यः। उदात्तादेर्द्व्यक्षरस्य नास्येति व्यञ्जनोपधः। नियूयपिष्टतमयाभिपद्य प्रास्य संगत्यानुदृश्याभिवृत्य। आरभ्य सम्मील्य मत्तुङ्गमाभिरभिवृग्य यत्र निषद्य वीति च। न हि जह्यभिवीर्येण कृधीतिकृणुथेति च। एतान्येकाक्षरे पदे त्रैप्रीभाव्ये पराणि च ॥ १ ॥

(अथ द्वितीयः खण्डः)

युक्ष्व मन्दस्व विद्मेति हीति विद्धि पिबत्विति। जुहोत यज धासथ शिशीत भरेति स्विति। सु नु हीत्येतेषु परेष्वधेति त्वम्पत्तेन मुञ्चताद्येति वीति। सु न्वित्यनर्थपरयोरुकारः पदं तयोरुत्तरयोर्जघेति। मृळयद्भ्यां वसुवित्तमं यत्सोमं जातवेदसम्। भरतेत्येतेष्वपादान्तोऽद्येति करणादिषु। करणञ्च चित्करते वृणीमहे भवन्तं कृणोतु भवतः स्वस्तये।

पुर्विति चित्पुरुहूतो नृषूतः सहस्राणि पुरुभुजा धियायते। वहेति त्वं दुहितर्दैव्य मुत्तरं द्युम्नं रुद्रं नव्य मेतेषु वर्द्धय। चिन्महित्वं गीर्गृणानः सतेपरं न्वित्यन्त्ये चेन्मर्त्तशब्दाद्रिवः परे ॥ २ ॥

(अथ तृतीयः खण्डः)

तूतुजानो मतिभिर्भोजनानि नोदद्धि स्तोमं भूरि योनिं त्व मेषु। भरेत्येतन्ननु चिद्यो भवेति स्तोतृभ्यो द्युम्नी शतमे परेषु। शोचायविष्ठ्यै वा यथा कर्त्तायत् सादयासप्त। अर्चामरुद्भ्य स्तिष्ठानः सनास्वः पारयानव्यः। बोधास्तोत्रे चकृमाब्रह्मवाहः शंसागोषू च्छादुहित र्वदातना। अजानष्टं जम्भयाता अधा-मह्नो गन्तामा युध्वाहि सृजावनस्पते। अग्ने रक्षाण स्तिष्ठाहिरण्ययं सोतावरेण्यं शोचामरुद्वृधः। शिक्षा-स्तोतृभ्यो भूमाचिवन्धुरः पिबामधूनां सोतापरीति च। सत्त्व मिमित्त्व दधिष्व वसिष्व श्रोत सुनोत हिनोत पुनात। विद्म जगृह्म ररम्भ ववन्म चाम सुपप्तनि मन्यत मत्स्व ॥ ३ ॥

(अथ चतुर्थः खण्डः)

सर रद रण जिन्व धारयार्षं चर यज यच्छ दयस्व साध सेध। तप रुज मृळ वर्द्ध यावयान

श्रवय नमस्य विदाष्ट कृष्व जोष। शृणुधि शृणुत यन्त यच्छत स्तव सिम गूहत कुत्र मोषथ। दिघ्रत पचत वृश्च विध्यताथ मदथात्त यदीत पाथन। उपागत्या खखलीकृत्य वव्राजा विष्टनो रुध्य। दूष्कर्त्तॄ-ळिष्व मर्मृज्य विभये यत्तं तच्छतम्। सार्द्धमन्द्रा-दिभिः प्लुतैः पादादौ व्यञ्जनोदयम्। न्वेववर्जन्नसंयोगे शेषे चापठिते सति। वर्द्ध शुम्भ रुजयः सेध राजन् वह हव्यानि यदि मेधयामनि। विद्म दातार मध्व धारया धय दधते विश्वं पुरुवा ऽर्चं गाय ॥ ४ ॥

(अथ पञ्चमः खण्डः)

वहवायो पिबमध्वः पुरुविद्वान् पुरुविश्वा न्यध-वायुं पुरुशस्त। यदिमृत्यो रधजिह्वा पुरुविश्वा पिबशुद्धं पिबराये वहकुत्सम्। भरद्वाजे ऽर्चं-देवाय यदिवा पुरुदाशुषे। वहशुष्णायाधवत्त्व धयत् पुरुह्वीति न। कृधीतिपरेषु सहस्रसाम्भियं जरिचेन इति तचेति चान्ये। सहस्रेन सुश्रवसं पवस्वद्वेनो अधीत्यतेषु परेषु तेन। देवं वेनं केत मित्युत्तरेषु दधातेति शुधि वंस्वेति नःपरे। वेदेति विश्वस्य भूमं न उत्तरं शुनःशेपे च प्लवते यकारे। ब्रह्मेति नो द्वे च गिरः कृणोति ते कृणोत तूतो दितिचोत्तरेषु।

अभीति नो नु नवन्ते सतोनरं द्वासत् स्वित्याग्ने-ऽर्षंपरे तु मुखेत्र ॥ ५ ॥

(अथ षष्ठः खण्डः)

चक्रुर्वदेती दशभ्यन्तसमुद्रो रथेन सः सप्तऋषीन् मदन्ति। ते वीभयं ते नियुङ्गिः कृपीटं रथस्य सोमस्य मती रणन्ति। समुद्रं द्वे स्वर्णं नवग्वशब्दो दशग्वं दंसिष्ठ वेसूनि नो वसु। वृत्रं निर्देनु यतिभ्यः सहन्तः पृथिव्यां निर्हंसि समत्सु पावक। यत्रेति चक्रुरादिषु नरः सुपर्णा इति च। समुद्रादिषु येनेति तत्रेति मे सदोरथम्। अवेति नो नु कल्पेषु नूनं वाजेषु पृत्सुषु। आद्यो चेद्वाजयुं पार्ये क मग्ने मघवन् परे। रास्वापितः शतेनानो वर्द्धस्वासु श्रुधीहवम्। मन्दस्वासु वहस्वासु वनेमाते नहीनुवः ॥ ६ ॥

(अथ सप्तमः खण्डः)

पायादिवो धातारयिं सृजतागयसाधनम्। रास्वाचोरून शग्धीनः सृजतामधुमत्तमम्। जही-चिकित्वो वेत्याहि रत्नथान हतामखम्। युयो-वाग्नरं स्वेनाहि वनेमाररिमावयम्। प्रप्रावोऽग्ने धामाह सनाज्योतिरपावृधि। ऋध्यामाते वाम-

देव्यं जुहोतामधुमत्तमम् । यत्वामहे धिष्वाशवो जनिष्वादेववीतये । अधात्वं ह्यव्याद्यश्वश्व: सच-स्वान:स्वस्तये ॥ ७ ॥

॥ इति पार्षदे द्वितीयस्य प्रथमं पटलम् ॥ १ ॥ ७ ॥

॥ अथ द्वितीयाध्याये द्वितीयं पटलम् ॥

(तत्रायं प्रथमः खण्डः)

अन्त:पादं विग्रह एष्वपृक्त उकारो व्रजस्य सुधा नमोभिः । शुचिं पवित्रं तु महीनुंचाम्रुतं सुतस्येति यद्युदयो दयान । सोमसुतिं चक्रिराम स्तवाम स्तवाना गभाय रथं श्रुधीति । तेअस्ति तेमहिमनः प्रवोचत प्रवोचं नःसुमना द्वैपदास्त्र । महे दधिध्वं तिर मुञ्च नो मृधस्वर नमध्वं नमयन्ते नयन्त । स्विल्येतेष्वेकाक्षरयोः पराणि चेदुपेन्द्राग्ने चाध्वर मायुरेत्विति । सदेत्येतद्योनिषु पीतयेपरं धन्वे-त्येतत्सोमराट्पूयमानः । यदीतिक्रतो मनसः कवीनां सबन्धवो गोः सरमेति तेषु । चरेति पुष्टिं सोम-चर्षणिप्रा जनिमेतिहन्ति संजातवेदा । रध-

येति येषु कं शासदुत्तरं ननःकारेस्वित्युपसातये परे ॥ १ ॥ ८ ॥

(अथ द्वितीयः खण्डः)

महयाच जय काव्येन गूर्द्दय भरेति च स्वरिति-प्रत्यये षट्। मद पर्ष पिपृत धन्व यच्छत रुहेमेति स्वस्तय उत्तराणि। दधिम मदत तन्वि सिञ्चत स्तव वदता नजर चतो चत। पिपृत पृणात पृच्छत प्रुष स्थ घ हिनवाय जुहोत पश्यत। चक्रमा कुत्र भूभ स्म शिशीत स्तोत पप्तत। यथोदयानि सर्वाणि त्विति चैकाचरोपधम्। कदा हरिवो वरुणस्य चक्रतुः सूर्यस्य निश्रा इव भूमेत्येषु न। वस्त्राणि हि बावधे यज्ञियानां तेदंसोद्वे नः सच शक्र तेषु तु। चक्रमेति द्वैपदे भूरिदुष्कृतं वर्द्धतां विप्रवचसो जिह्वयेति। काण्वायना निष्कृती रेतयोः स्थ जाताः सुरथा हवन-श्रुतश्च ॥ २ ॥ ९ ॥

(अथ तृतीयः खण्डः)

स वा परङ्क्तेति न कौत्सवैमदं स्मराशिमित्या-दिषु न प्रतिष्म च। स्मते परेषु व्रजनं वनस्पते शुभे परुष्णां स्म पुरा वृषाकपौ। राशिं वाजेषु मे सद्म पूषणं तं टंहद्वायि मा दुहंणायतः।

यस्मै यद् वृत्रहत्येषु मावते वातो ऽयं यस्य मर्दुग्रभीयसे। पृच्छा विपश्चित मवा पुरन्ध्या द्यावत्वद्रिग् वीरान् वनुयामा त्वोताः। जनया दैव्यं भुजेमा तनूभिर्हविहतो वासया मन्मना च। विदावसुधितिं रोमा पृथिव्या वोचासुतेषु धावनामुहस्त्यः। मुञ्चासुषुवुषः स्वप्ना पितूना मिहावृणीष्व बोधयापुरन्धिम्। अवथासः कृणुथासुप्रतीकं तिराशचीभिः कृणुतासुरत्नान्। ग्मन्तानहुषो नयताविथन्तः स्वाच्यावयं नीरयावृष्टिमन्तम् ॥ ३ ॥ १० ॥

(अथ चतुर्थः खण्डः)

असृजता मातरं सूरथंहुवे नयतावद्वं स्वापयामिथूदृशा। इताजयता गतासर्वतातय ईरयथामरुतो नेषथासुगम्। अन्यचाचित् पिबतामुञ्जनेजनं घास्या वोचेमाविदथेष्विताधियम्। इतानि यचावि दशस्यथाक्रिविं चाबोधाति द्रावयात्वं किरावसु। हापदेव कर्त्तनाश्रुष्टिं योधयाच जग्रभावाचम्। पाययाच तर्पयाकामं गातुयाच मन्दयागोभिः। घास्याला देनासुमतिं वोचानु व्यथयामन्युम्। तेथाव चक्राजरसं भवतामृळयन्तश्च।

एवाचन भजाराये ररिमाते भजाभूरि। श्रुधीन उभयत्राते भजात्वं मृळयानस्व ॥ ४ ॥ ११ ॥

(अथ पञ्चमः खण्डः)

एकादशद्वादशिनोर्लघावष्टममक्षरम्। उदये संहिताकाले नकारे च गुरावपि। दशमस्यैतयो-र्वं षष्ठञ्चाष्टाक्षरेऽक्षरम्। वृहैः सम्पत्समीच्योर्नै चैप्रवर्णैकभाविनाम्। नवावृधन्तमर्त्तस्यावद्यानि जिघांससि। सासह्याम ववृत्याम दीदिह्यष्टम मूर्णुहि। पुरुप्रजा तस्याभिनः कृणुहि द्व्यक्षरोपधम्। हर्यश्वोतभवन्त्विन्द्र सदनायास्ति नामचित्। चम-सांइवाग्नि वसवान द्वादशिनः सृजास्य विमदस्य। सुमुखाय धारय ददातु रक्षधिया दधातु दिधि-षिय ॥ ५ ॥ १२ ॥

(अथ षष्ठः खण्डः)

अङ्ग सरस्वति पञ्च चरन्ति ग्नाभिरिहेन्वसि रण्यसि धाव। विद्विषुणो ऽभिषतः सुविताय त्वा-समिधान दधीमहि देव। जामिषु जामु चिकित किरासि स्वस्युप पात्यसि सोम शतस्य। आयुषि चेतति विष्टपि मास्व प्रोक्ष्मसि मूर्द्धनि सद्म चरन्त। प्रदिवि वरुण तमसि तिरसि घृतमिव दिवे मम